श्री वश्य वाराही स्तोत्रं

ॐ अस्य श्री सर्व वशीकरण स्तोत्र मंत्रस्य
नारद ऋषिःअनुष्टुप् छंदः
श्री वश्यवाराही देवता
ऐं बीजं क्लीं शक्तिः ग्लौं कीलकं
मम सर्ववश्यार्थे जपे विनियोगः

ध्यानम् –
तारे तारिणि देवि विश्वजननि प्रौढप्रतापान्विते
तारे दिक्षु विपक्ष यक्ष दलिनि वाचा चला वारुणी |
लक्ष्मीकारिणि कीर्तिधारिणि महासौभाग्यसंदायिनि |
रूपं देहि यशश्च सततं वश्यं जगत्यावृतम् |

अथ स्तोत्रम् –

अश्वारूढे रक्तवर्णे स्मितसौम्यमुखांबुजे |
राज्यस्त्री सर्वजंतूनां वशीकरणनायिके || 1 ||

वशीकरणकार्यार्थं पुरा देवेन निर्मितम् |
तस्माद्वश्यवाराही सर्वान्मे वशमानय || 2 ||

यथा राजा महाज्ञानं वस्त्रं धान्यं महावसु |
मह्यं ददाति वाराहि यथात्वं वशमानय || 3 ||

अंतर्बहिश्च मनसि व्यापारेषु सभाषु च |
यथा मामेवं स्मरति तथा वश्यं वशं कुरु || 4 ||

चामरं दोलिकां छत्रं राजचिह्नानि यच्छति |
अभीष्ठं संप्रदोराज्यं यथा देवि वशं कुरु || 5 ||
मन्मथस्मरणाद्रामा रतिर्यातु मयासह |
स्त्रीरत्नेषु महत्प्रेम तथा जनयकामदे || 6 ||

मृग पक्ष्यादयाः सर्वे मां दृष्ट्वा प्रेममोहिताः |
अनुगच्छति मामेव त्वत्प्रसादाद्दयां कुरु || 7 ||
वशीकरणकार्यार्थं यत्र यत्र प्रयुंजति |
सम्मोहनार्थं वर्धित्वात्तत्कार्यं तत्र कर्षय || 8 ||

वशमस्तीति चैवात्र वश्यकार्येषु दृश्यते |
तथा मां कुरु वाराही वश्यकार्य प्रदर्शय || 9 ||
वशीकरण बाणास्त्रं भक्त्यापद्विनिवारणम् |
तस्माद्वश्यवाराही जगत्सर्वं वशं कुरु || 10 ||

वश्यस्तोत्रमिदं देव्या त्रिसंध्यं यः पठेन्नरः |
अभीष्टं प्राप्नुयाद्भक्तो रमां राज्यं यथापिवः || 11 ||

इति अथर्वशिखायां वश्यवाराही स्तोत्रम् |